# समासा: ।


**समासा:**

- द्वन्द्वः
  - इतरेतरद्वन्द्वः
  - समाहारद्वन्द्वः
- तत्पुरुषः
  - विभक्ति-तत्पुरुषः
  - उपपद-तत्पुरुषः
  - नञ्-तत्पुरुषः
  - कर्मधारयः
    - विशेषण-विशेष्य-सम्बन्धः
    - विशेषनाम-सामान्यनाम-सम्बन्धः
    - उपमान-उपमेय-सम्बन्धः
- बहुव्रीहिः
- अव्ययीभावः

द्वन्द्वः तथा च विभक्ति-तत्पुरुषः इति प्रकारद्वयम् अस्माभिः गतवर्षे पठितम् । अधुना समासानाम् अन्यप्रकारान् जानीमः ।


## पुनःस्मारणम्

**१. समासविग्रहं कुरुत ।**



धनधान्यानि ।

________




मृगशृगालौ ।

________



शुकसारिकाः ।

________




हस्तपादम् ।

________



सस्यपूर्णम् ।

________



जलव्यवस्थापनम्

________



अश्मखण्डः ।

________




नीतिनिपुणः ।


________

**२. उदाहरणैः रेखाचित्रं पूरयत ।**


अ)




आ)




इ)




**३. षष्ठीतत्पुरुषसमासस्य समस्तपदम् अन्विष्य तत्परितः वर्तुलम् आलिखत ।**

| | | | | | | |
|---|---|---|---|---|---|---|
| भ्र | म | ण | स | म | यः | म् |
| ज | नः | रा | ज | ध | र्मः | ऋ |
| ल | ट्ट | चः | पु | नि | रा | ज्ञः |
| व्य | वः | हा | स्त | कः | प | स्था |
| व | नि | क्षे | क | हो | क्रि | या |
| स्था | तो | त्र | प | अ | या | स |
| प | ञ् | प | ठ | सा | सि | म् |
| न | ऋ | तिः | न | म् | द्धिः | म् |
| म् | भ्र | म् | म् | स | म् | र्मः |

१. क्षेत्रस्य पतिः ।
२. जलस्य व्यवस्थापनम् ।
३. राज्ञः धर्मः ।
४. पुस्तकस्य पठनम् ।
५. भ्रमणस्य समयः ।
६. क्रियायाः सिद्धिः ।


**४. तालिकां पूरयत ।**

| समस्तपदम् | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| चिन्ताकुलः | ——— | तृतीया-तत्पुरुषः । |
| प्रजाहितदक्षः | प्रजाहिते दक्षः । | ——— |
| ——— | चोरलुण्ठकेभ्यः भयम् । | पञ्चमी-तत्पुरुषः । |
| विदेशगमनम् | ——— | द्वितीया-तत्पुरुषः । |
| ——— | चरणाभ्यां विकलः । | तृतीया-तत्पुरुषः । |
| पुस्तकपठनमग्नः | ——— | सप्तमी-तत्पुरुषः । |
| विद्याविहीनः | ——— | तृतीया-तत्पुरुषः । |
| भुजगयमिताः | भुजगैः यमिताः । | ——— |
| ——— | पूजायै इदम् । | ——— |
| मदान्धः | मदेन अन्धः । | ——— |


## १. तत्पुरुषः समासः ।

### उपपद–तत्पुरुषः ।


१. जलं ददाति
इति **जलदः** ।



२. पादैः पिबति
इति **पादपः** ।



३. पर्वते तिष्ठति
इति **पर्वतस्थः** ।



४. कुम्भं करोति
इति **कुम्भकारः** ।




**अवधेयम् – उपपद–तत्पुरुषः**


* **उत्तरपदे धातोः अंशः दृश्यते ।**
* **विग्रहे तस्य धातोः लट्लकारस्य प्रथमपुरुषस्य योग्यं वचनं योजनीयम् । यथा –**
  शास्त्रज्ञः – शास्त्रं जानाति इति ।
* **तथा च अर्थदृष्ट्या पूर्वपदस्य योग्या विभक्तिः योजनीया । यथा –**
  पङ्कजम् – पङ्के जायते इति ।

**उदाहरणानि –** वरदा – वरं ददाति इति । गृहस्थाः – गृहे तिष्ठन्ति इति । मधुपः – मधु पिबति इति ।
विद्यार्थी – विद्याम् अर्थयते इति । जटाधारी – जटाः धारयति इति ।


### नञ्–तत्पुरुषः ।



योग्यम्



न योग्यम् – **अयोग्यम्** ।



अल्पम्



न अल्पम् – **अनल्पम्** ।

**अवधेयम् – नञ्–तत्पुरुषः**

* **प्रथमपदम् 'अ/अन्' इति नकारं दर्शयति ।**
* **विग्रहे 'अ'/अन् स्थाने 'न' इति प्रयोजनीयः ।**


**उदाहरणानि –** अनिच्छा – न इच्छा । अशक्यम् – न शक्यम् ।
अनावश्यकम् – न आवश्यकम् । असत्यम् – न सत्यम् ।

# कर्मधारयः ।


## ※ विशेषण–विशेष्य–सम्बन्धः ।




रक्तं पुष्पम् ।
रक्तपुष्पम् ।




हरिताः शुकाः ।
हरितशुकाः ।




स्थूलः पुरुषः ।
स्थूलपुरुषः ।



विविधाः वर्णाः ।
विविधवर्णाः ।




दीर्घा यष्टिका ।
दीर्घयष्टिका ।




उन्नताः वृक्षाः ।
उन्नतवृक्षाः ।

## ※ विशेषनाम–सामान्यनाम–सम्बन्धः ।



विवेकानन्दः नाम महोदयः।
विवेकानन्दमहोदयः ।



गङ्गा नाम नदी ।
गङ्गानदी ।




भारतः नाम देशः ।
भारतदेशः ।



सरस्वती नाम देवी ।
सरस्वतीदेवी ।





भास्करः नाम आचार्यः ।
भास्कराचार्यः ।





शेगाव इति स्थानकम्
शेगावस्थानकम् ।


❋ उपमान–उपमेय–सम्बन्धः ।

अ) कर्पूरः इव गौरः =   



कर्पूरः (उपमानम्) इव गौरः (साधर्म्यम्) = **कर्पूरगौरः** (महादेवः–उपमेयम्)

घनः इव श्यामः =   


घनः(उपमानम्) इव श्यामः (साधर्म्यम्) = **घनश्यामः**(श्रीकृष्णः–उपमेयम्)

आ) **पादपङ्कजम्** =  



पादौ (उपमेयम्) पङ्कजम् (उपमानम्) इव ।

**मुखकमलम्** =  

मुखम्(उपमेयम्) कमलम् (उपमानम्) इव।

इ) **विद्याधनम्** =  

विद्या(उपमेयम्) एव धनम् (उपमानम्) ।

**गृहमन्दिरम्** =  

गृहम् (उपमेयम्) एव मन्दिरम् (उपमानम्) ।

**अवधेयम् –**

**कर्मधारयः**

**❋ समस्तपदानां विग्रहे पूर्वपदम् उत्तरपदं च प्रथमान्तम् ।**

**❋ पूर्वपदं विशेषणं चेत् तद् विशेष्यस्य लिङ्गं, वचनं, विभक्तिम् अनुसरति ।**


**उदाहरणानि –**

अ) प्रियभाषा – प्रिया भाषा ।
सर्वप्रदेशाः – सर्वे प्रदेशाः ।
बहुजनाः – बहवः जनाः ।

आ) कमलकोमलः – कमलम् इव कोमलः ।
सूक्तिसुधा – सूक्तिः सुधा इव ।

इ) मनोमन्दिरम् – मनः एव मन्दिरम् ।
संसारसागरः – संसारः एव सागरः ।


## २. बहुव्रीहिः समासः ।



वाहनं हि ते भवति मूषको **मूषकवाहन** नमोऽस्तु ते ।
कर्णौ तव रे शूर्पाकारौ **शूर्पकर्ण** हे नमोऽस्तुते ।।
आननं हि ते गजस्यैव हे देव **गजानन** नमोऽस्तु ते ।
कायस्तव रे महामहीयान् **महाकाय** हे नमोऽस्तु ते ।।१।।



चन्द्रस्ते शोभते भाले **भालचन्द्र** नमोऽस्तु ते ।
कण्ठस्ते विद्यते नीलो **नीलकण्ठ** नमोऽस्तु ते ।।३।।



गदा ते विद्यते हस्ते **गदाहस्त** नमोऽस्तु ते ।
बलं ते हि महद् देव **महाबल** नमोऽस्तु ते ।।४।।

**अवधेयम् –**

**बहुव्रीहिः –** 
- ✻ अन्यपदार्थप्रधानः ।
- ✻ नित्यं विशेषणं दर्शयति ।
- ✻ विग्रहे 'यद्' इत्यस्य उपयोगः सम्बन्धदर्शनाय भवति ।
- ✻ विग्रहे 'तद्' इत्यस्य उपयोगः अन्यपदं सूचयति ।

✻ **बहुव्रीहिः – उदाहरणानि**

**मूषकः वाहनं** यस्य सः मूषकवाहनः ।
**श्वेतम् अम्बरं** यस्याः सा श्वेताम्बरा ।
**शुभ्रं वस्त्रं** यस्याः सा शुभ्रवस्त्रा ।
**पीतम् अम्बरं** यस्य सः पीताम्बरः ।
**शूर्पौ इव कर्णौ** यस्य सः शूर्पकर्णः ।

✻ **बहुव्रीहिः – उदाहरणानि**

**शशी शेखरे** यस्य सः शशिशेखरः ।
**चक्रं पाणौ** यस्य सः चक्रपाणिः ।
**शङ्खः हस्ते** यस्य सः शङ्खहस्तः ।
**भुजगे शयनं** यस्य सः भुजगशयनः ।

**समासविग्रहे क्वचित् पूर्वपदं उत्तरपदं च समानविभक्तौ भवतः क्वचित् न इत्यपि अवधेयम् ।**

कृतिः – समस्तपदान् अन्विष्य वर्तुलम् आलिखत ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा | ल | च | न्द्रः | वि | र | ई | अ |
| सु | ह | दः | वि | म | लः | श्व | जा |
| क्षु | द्र | बु | द्धिः | ला | ए | र | त |
| ल | ब्ध | शि | क्षः | म्बु | क | नि | श |
| ग | जा | न | नः | यः | द | ष्ठः | त्रुः |
| वि | शा | ल | बा | हुः | न्तः | न् | स |
| प | द्म | ह | स्ता | म | हो | द | यः |

१) क्षुद्रा बुद्धिः यस्य सः ।
२) विशालौ बाहू यस्य सः ।
३) एकः दन्तः यस्य सः ।
४) लब्धा शिक्षा येन सः ।
५) ईश्वरे निष्ठा यस्य सः ।
६) भाले चन्द्रः यस्य सः ।
७) पद्मं हस्ते यस्याः सा ।
८) गजस्य आननम् एव आननं यस्य सः ।
९) विमलम् अम्बु यस्मिन् तत् ।
१०) महान् उदयः यस्य सः ।

## ३. अव्ययीभावः समासः ।

* प्रथमं पदं तथा सम्पूर्णं समस्तपदम् अव्ययं भवति अतः अव्ययीभावः इति उच्यते ।
* विग्रहः तु अव्ययस्य अर्थानुसारम् ।
* नित्यं नपुंसकलिङ्गम् एकवचनं वर्तते ।
* नित्यं वाक्ये क्रियाविशेषणरूपेण प्रयुज्यते ।

**उदाहरणानि –**

१) श्यामः दिने दिने पाठशालां गच्छति ।
श्यामः **प्रतिदिनं** पाठशालां गच्छति ।

२) भारतस्य गृहे गृहे संस्कृतं भवतु ।
भारतस्य **प्रतिगृहं** संस्कृतं भवतु ।

३) माता अहनि अहनि देवपूजां करोति ।
माता **प्रत्यहं** देवपूजां करोति ।

४) भास्करः इच्छाम् अनुसृत्य भोजनं करोति ।
भास्करः **यथेच्छं** भोजनं करोति ।

५) रघुः शक्तिम् अनुसृत्य दानं करोति ।
रघुः **यथाशक्ति** दानं करोति ।

६) छात्राः क्रमम् अनुसृत्य वर्गं प्रविशन्ति ।
छात्राः **यथाक्रमं** वर्गं प्रविशन्ति ।

**सकोपम्, सवेगम्, सानन्दम् इत्यपि अव्ययीभाव–समासस्य एव उदाहरणानि –**

१) माता बालकं स्नेहेन सह भोजयति ।
माता बालकं **सस्नेहं** भोजयति ।

२) भक्तः श्रद्धया सह देवं पूजयति ।
भक्तः **सश्रद्धं** देवं पूजयति ।


३) वर्षाकाले मयूराः आनन्देन सह नृत्यन्ति ।
वर्षाकाले मयूराः **सानन्दं** नृत्यन्ति ।

४) छात्राः उत्साहेन सह संस्कृतं पठन्ति ।
छात्राः **सोत्साहं** संस्कृतं पठन्ति ।

# दशमः पाठः नदीसूक्तम् । (सरलार्थलेखनार्थम्)

विश्वे विद्यमानं प्राचीनतमं साहित्यं नाम वेदवाङ्मयम् इति बुधाः मन्यन्ते। ऋग्वेदस्य तृतीयमण्डले 'विश्वामित्र-नदी' संवादः वर्तते। विश्वामित्रः नदीं मातरम् इव पूजयति । मानवीया संस्कृतिः नदीतीरे एव विकसिता। अतः अस्माभिः नदी सर्वथा रक्षणीया । **डॉ. मञ्जूषा गोखले** महाभागया नदीसूक्तम् अनुसृत्य रचितात् नाट्यात् संवादोऽयं स्वीकृतः।

- 'नमामि गङ्गे' इति योजनाविषये किं जानासि ?
- जलविद्युन्निर्माणं कथं भवति ?



(रङ्गमञ्चे – कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः – गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे प्रतिपदायां तिथौ गङ्गादशहरापर्व समायोज्यते । पर्वण्यस्मिन् नदीपूजनं कर्तव्यम्।

श्रोतृवृन्दः – नदीपूजनम् ? किमर्थं नदीपूजनम् ?

कीर्तनकारः – नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति। द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति ।

जलं प्राशनार्थम् । कृषिवर्धनार्थम् ।
विद्युन्निर्माणार्थम् । जलं जीवनार्थम् ।।

सजीवानां कृते नदी देवितमा । नदी मातृतमा । अतः अद्य नदीसूक्तं सर्वथा श्रवणीयं स्मरणीयं च।

श्रोतृवृन्दः – भोः पुराणिकवर्य, कथं नदी अस्माकं माता ? कीदृशाः नदीनाम् उपकाराः ?

कीर्तनकारः – शृणुत आर्याः शृणुत । अतिप्राचीना खलु एषा कथा । अस्ति विश्वामित्रः नाम कुशिकपुत्रः मुनिवरः। सपरिवारं, सगोधनं सः दूरतः आगतः । मार्गम् आक्रामन् सः विपाट् तथा शुतुद्री एतयोः नद्योः सङ्गमं प्राप्तः ।

(ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य... )

विश्वामित्रः – कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं मया गोधनं च ।।
कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।।

नदी(विपाट्)– कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ?

विश्वामित्रः – अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः ।

नदी(शुतुद्री) – विप्रवर, मधुरा खलु ते वाणी । रञ्जयति अस्मान् । वद कथं तव साहाय्यं कर्तव्यम् ?

विश्वामित्रः – अम्ब, शृणु मे अभ्यर्थनाम् । गाधा मे भविष्यसि ? स्वल्पीभवतु जलौघः । येन वयं सुखेनैव परतीरं प्राप्तुं शक्नुमः ।

नदी(विपाट्)– देवेन्द्रः खलु परमेश्वरः मार्गं मह्यं प्रदत्तवान् ।
हत्वा वृत्रं वज्रहस्तः नदीप्रवाहं विमुक्तवान् ।।
मया न कार्या तस्य अवज्ञा क्रुद्धो देवो भविष्यति ।
क्षमस्व विश्वामित्र कदापि नैव विरामः सम्भवति ।।

नद्यौ – रे विश्वामित्र, नैव विरमावः त्वत्कृते । नैव कुर्वः देवेन्द्रस्य कार्ये अधिक्षेपम् ।

विश्वामित्रः – नैव मातः, मास्तु देवेन्द्रस्य अवज्ञा । केवलम् इच्छामः परतीरं गन्तुम् । हे मातः, प्रसीद । वयं सर्वे तव पुत्राः एव । न वयं कदापि तव उपकारान् विस्मरामः । न किञ्चिदपि अस्माभिः कर्तव्यं येन तव अधिक्षेपः भवेत् । एषा मे प्रतिज्ञा ।

नदी(विपाट्)– किम्? एषः मर्त्यः मां माता इति सम्बोधयति ?

नदी(शुतुद्री) – कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु ! किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति ?

विश्वामित्रः – न हि मातः, नैतत् शक्यम् । सर्वाः सरितः सुखं वहन्तु ।
सर्वे जनाः सुखिनः सन्तु ।। (विश्वामित्रः निर्गच्छति ।)

कीर्तनकारः – एवं विश्वामित्रः नद्यौ प्रीणयित्वा परतीरं गतवान् । अयि श्रोतारः, इत्थं नद्यः मानवाः च परस्परं प्रीणयन्तः संस्कृतिं संवर्धितवन्तः ।

प्रवाहिता तरङ्गिणी संस्कृतिर्विकासिता ।
प्रमुदिताश्च मानवाः सरित्कृपासमुन्नताः ।।
नन्दिताः कृषीवलाः प्रफुल्लिता वसुन्धरा ।
अन्नदाननिर्भरा सस्यश्यामला धरा ।।
सेतुबन्धरोधितं नियन्त्रितं नदीजलम् ।
जनित्रमत्र चालितं जीवनं प्रकाशितम् ।।

अयि श्रोतृवराः, इत्थं मानवीयं जीवनं नदीतीरे, नदीनामेव साहाय्येन समृद्धम् ।

**अधुना कथयत, अपि विश्वामित्रस्य वचनं तस्य वंशजाः नाम वयं सर्वे मनुजाः अधुनाऽपि अनुसरामः?**

## भाषाभ्यासः



### १. माध्यमभाषया उत्तरत ।

अ) विश्वामित्रः नद्यौ किं प्रार्थयते?

आ) मानवानां जीवनं नदीनां साहाय्येन कथं समृद्धं जातम्?

745E6S